दिनाङ्क: 13.03.2026

प्रात: - 06:55

<u>प्रधानमन्त्री – NXT सम्मेलनम्</u>

प्रधानमन्त्री श्रीनरेन्द्र-मोदी प्रोक्तवान् यत् पश्चिम एशियायां वर्धमान-संघर्षस्य मध्येऽपि भारतम् विश्वे मान्यताप्राप्त-विश्वसनीय-राष्ट्ररूपेण तिष्ठति । ह्यः नवदिल्लीनगरे एन.एक्स.टी-सम्मेलनं सम्बोधयन् श्रीमोदी अवदत् यत् क्षेत्रे समाह्वान-पूर्णस्थितावपि देशः स्थिरः विकासशीलः च अस्ति।

श्रीमोदी अवदत् यत्, पश्चिम एशियायां युद्धस्य कारणेन आपूर्तिशृङ्खलायां व्यत्ययस्य निवारणाय सर्वकारः स्थितिं निकटतया निरीक्षते । ऊर्जाक्षेत्रे सम्बद्धानाम् आव्हानानां निवारणाय सर्वकारस्य प्रतिबद्धतां पुनः पुष्टिं कृत्वा सः अवदत् यत् तैलस्य उत्पादनं प्रोत्साहयितुं, ऊर्जाप्रवेशस्य विस्तारं कर्तुं, क्षेत्रे आत्मनिर्भरतां सुदृढां कर्तुं च प्रयत्नाः क्रियन्ते ।

<u>प्रधानमन्त्री-ईरान-राष्ट्रपतिः</u>

प्रधानमन्त्री नरेन्द्र मोदी पश्चिम एशिया क्षेत्रस्य गभीरस्थितेः विषये चर्चां कर्तुं ईरान-राष्ट्रपतिना मसूद पेजेश्कियन् इत्यनेन सह वार्तालापं कृतवान् । सामाजिक-माध्यम-सन्देशे श्रीमोदी अवदत् यत् परिस्पन्दस्य वर्धनं, नागरिकाणां जीव-हानिः अपि च नागरिक-मूलसंरचनायाः क्षतिः इत्यादिषु विषयेषु सः गभीरां चिन्ताम् अभिव्यक्तवान् । प्रधानमन्त्रिणा उक्तं यत्, वस्तूनाम् ऊर्जायाः च अबाधित-आयातागमनस्य आवश्यकतया सह भारतीय-राष्ट्रीयानाम् सुरक्षा, भारतस्य सर्वोच्चप्राथमिकता वर्तते । सः भारतस्य शान्ति-स्थिरतायाः प्रतिबद्धतां पुनरुक्तवान्, संवादस्य कूटनीतेश्च मार्गस्य आग्रहं कृतवान् ।

<u>एल्.प.जी.</u>

केन्द्रीय पेट्रोलियम एवं प्राकृतिक गैस मंत्री हरदीप सिंह पुरी ह्यः लोकसभायां पश्चिम एशियायां प्रचलित-संघर्षात् उत्पद्यमानस्य वैश्विक ऊर्जाप्रदान-व्यत्ययस्य प्रतिक्रियारूपेण सर्वकारेण कृतानां कार्याणां विषये वक्तव्यं दत्तवान् । सः अवदत् यत् देशस्य अपरिष्कृत-तैलस्य स्थितिः सुरक्षिता अस्ति तथा च एलपीजी इत्यस्य द्रव-पेट्रोलियम्-गैस ईन्धनस्य आन्तरिक आपूर्तिः पूर्णतया सुरक्षिता वर्तते । सः अवदत् यत्, त्रयस्त्रिंशत्-कोटिपरिवारेभ्यः विशेषतः निर्धनेभ्यः, विपन्नजनेभ्यश्च एलपीजी-आपूर्तिः अबाधितरूपेण प्रदानम् सर्वकारस्य प्राथमिकता अस्ति । मन्त्री अवदत् यत्, एलपीजी-उत्पादनं अष्टाविंशतिः प्रतिशतं वर्धितम् अस्ति, सम्प्रति च अग्रे क्रयणं प्रचलति ।

<u>प्रधानमन्त्री असमः</u>

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्यारभ्य असमराज्यस्य द्विदिवसीय-यात्रायां भविष्यति । अस्मिन्नवसरे प्रधानमन्त्री असमराज्ये अष्ट-शतोत्तर-सप्त-चत्वारिंशत् कोटिरूप्यकाणां मूल्यस्य बहुविधविकास-परियोजनानां आरम्भं करिष्यति ।

प्रधानमन्त्री अपराह्णे कोकराझारं गत्वा भूमिपूजनं करिष्यति, शिलान्यासं च करिष्यति, सप्तत्युत्तर-पञ्चशताधिक-चतुस्सहस्र-कोटिरूप्यकाणां परियोजनानां उद्घाटनं च करिष्यति ।

कृषकसम्माननिधिः

प्रधानमन्त्री नरेन्द्र मोदी अद्य गुवाहाटीतः कृषकसम्माननिधेः द्वाविंशतितमम् देयराशिं कृषकेभ्यः प्रदास्यति । केन्द्रीयकृषि-कृषक-कल्याणमन्त्री शिवराजसिंहचौहानः अवदत् यत् श्री मोदी प्रत्यक्षलाभ-हस्तांतरणद्वारा प्रायः द्वात्रिंशत् लक्षाधिक नव-कोटि कृषकाणां बैंक-वित्तकोषेषु चत्वारिंशदुत्तर-षट्शताधिक-अष्टादश-सहस्र-कोटिरूप्यकाणि विमोचयिष्यति । सः अवदत् यत् एतावता अस्याः योजनायाः अन्तर्गतं कृषकाणां कृते चतुर्लक्ष-सहस्राधिक-कोटिरूप्यकाणि पूर्वमेव स्थानान्तरितानि सन्ति।

लोकसभा

लोकसभायाम् अद्य ऐषमः अतिरिक्त-अभियाचना-अनुदानस्य अग्रिम-चर्चा मतदानं च भविष्यति । वित्तमन्त्री निर्मला सीतारामन् वर्या सदनस्य चर्चायाः उत्तरं प्रदास्यति । राज्यसभायां ग्रामीणविकासमन्त्रालयस्य कार्यकरणविषये अग्रे चर्चा भविष्यति ।

दिल्ली

दिल्ली सर्वकारेण आश्वासनं दत्तं यत् सम्पूर्णे राष्ट्रराजधानी-प्रदेशे एलपीजी, पेट्रोल, डीजल, पी.एन.जी च सर्वथा सामान्यं वर्तते, ईंधनस्य अभावः अपि नास्ति । सर्वकारेण, ईंधनस्य आपूर्तिशृङ्खलायां व्यत्ययसम्बद्धानां निराधाराणां वार्तालापानाम् अवहेलनं कर्तुं च जनेभ्यः आग्रहः कृतः ।

।। इति वार्ता:।।